**पुष्कराह्व** पु० पुष्करस्याह्वा आह्वा यस्य। सारसखगे अमरः पुष्कराह्वयमप्यत्र। तत्र पुष्करमूले कुष्ठौषधे न० राजनि०।

**पुष्करिका** स्त्री पुष्करं तदाकारोऽस्त्यस्य ठन्। शूकदोषनिमित्ते रोगभेदे "पित्तशोणितसम्भूता पिडका पिडकाचिता। या पुष्करसमानाभा ज्ञेया पुष्करिकेति सा" सुश्रुतः

**पुष्करिन्** पु० पुष्करं शुण्डाग्रमस्त्यस्य इनि। १गजे हारा०। स्त्रियां ङीप्। पुष्करादि० देशे गम्ये इनि ङीप्। २स्थलकमले ३पुष्करमूले कुष्ठौषधे राजनि०। ४पद्मिन्यां ५जलाशयभेदे मेदि०। जलाशयशब्दे ३०७५ पृ० तल्लक्षणादि दृश्यम्। ६चाक्षुषमनोःपत्नीभेदे हरिवं० २अ०। ७ऋचीकमाततरि भूमन्युपत्नीभेदे भा० आ० ९४ अ०। समूहार्थे इनि। ८पद्मसमूहे हेम०।

**पुष्कल** त्रि०पुष—कलच् किच्च आद्यकस्य नेत्त्वम् पुष्क+शिष्णा० लच् वा। १श्रेष्ठे अमरः २उपचिते जटा० ३बहुत्वयुक्ते च। "अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम्" इत्युक्ते ४परिमाणे न० ५भिक्षार्थदेवे अन्नमानभेदे न०। "भिक्षामाहुर्ग्रासमात्रमन्नं तस्माच्चतुर्गुणम्। पुष्कलं हन्तकारन्तु तच्चतुर्गुणमुच्यते" कूर्मपु०। ६असुरभेदे पु०। हरिवं० ४२अ०। ७भरतपुत्रे पु० भाग० ९।११।७।

**पुष्क(ष्क)लक** पु० गन्धमृगे त्रिका० रघुः १५।८। "सीम्नि पुष्क(ष्क)लोहतः" सि० कौ०। यमध्यपाठस्तत्रैव

**पुष्कलावत** पु० १उत्तरस्थे देशभेदे वृ०स०१४अ०। २भरतपुत्रपुष्कलस्य राजधान्याम् स्त्री।

**पुष्ट** त्रि० पुष—क्त। यस्य पोषणं कृतं तस्मिन् १कृतपोषणे अमरः। भावे क्त। २पुष्टौ न०। तत् कार्य्यतया अस्त्यस्य अच्। ३विष्णौ पु० "तुष्टः पुष्टः पुष्टिकरः" विष्णुस०।

**पुष्टावत्** त्रि० पुष्टं पोषणं कार्य्यत्वेनाऽस्त्यस्य मतुप् मस्य वः वेदे दीर्घः। पोषणकर्त्तरि सम्भृतचासे ऋ० ८।४५।१६

**पुष्टि** स्त्री पुष—भावे क्तिन्। १पोषणे अन्नादि नोपचयकरणे २वृद्धौ च मेदि०। कर्त्तरि क्तिच्। ३अश्वगन्धायां राजनि० शच्यादिषु ४मातृकाभेदे ५योगिनीभेदे ६धर्मस्य पत्नीभेदे भा० ६६अ०। [राजनि०।

**पुष्टिका** स्त्री पुष्ट्यै कं जलमस्याः। जलशुक्तिकायां

**पुष्टिकान्त** पु० ६त०। गणाधिपे गणेशे।

**पुष्टिद** त्रि० पुष्टिं ददाति दा—क। १पोषणकारके २अश्वगन्धायां स्त्री राजनि०।

**पुष्टिपति** पु० १अग्निभेदे भा० व० २२० अ०। २सरस्वत्यां च शत०ब्रा० ११।४।३।१६।

**पुष्प** विकाशे दि०पर०अक०सेट्। पुष्यति अपुष्पीत्। पुपुष्प "शरदि पुष्यन्ति सप्तच्छदाः"। कण्ड्वा०अपुष्प्यीत्।

**पुष्प** न० पुष्यति पुष्प—विकाशे अच्। (फुल) ख्याते १कुसुमे २स्त्रीरजसि। भावे घञ्। ३विकाशे पु० मेदि० ४कुवेरविमाने न० नेत्ररोगभेदे हेमच०। "पुष्पञ्च पत्रं च फलं तथैव यथोत्तरं ते लघवः प्रदिष्टाः तेषां तु पुष्पं कफपित्तहन्तृ फलं निहन्यात् कफमारुतौ च" सुश्रुते सामान्यतस्तस्य गुणा उक्ताः। विशेषतः पुष्पवर्गे अन्येषां गुणा तत्रोक्ताः। स्त्रीरजसि "शुक्रं दुष्टं शोणितं चाङ्गनानां पुष्पोद्रेकं तस्य नाशश्च कष्टम्। पुष्पकाले शुचिस्तस्मादपत्यार्थी स्त्रियं व्रजेत्" इति सुश्रुतः। पुष्पशब्दनिरुक्तिस्तद्गतविशेषादिकं नानातन्त्रे उक्तं यथा तत्र पुष्पशब्दव्युत्पत्तिः कुलार्णवे "पुण्यसंवर्द्धनाच्चापि पापौघपरिहारतः। पुष्कलार्थप्रदानाच्च पुष्पमित्यभिधीयते"। प्रपञ्चसारे "तुलस्यौ पङ्कजे जात्यौ केतक्यौ करवीरके। शस्तानि दश पुष्पाणि तथा रक्तोत्पलानि च। उत्पलानि च नीलानि कह्लारकुमुदानि च"। विश्वसारतन्त्रे "बहूनि कुसुमानि च" इति पाठः। "मालतीं कुन्दमन्दारं नन्द्यावर्त्तादिकानि च। पलाशपाटलापद्मजयन्त्यावर्त्तकानि च। चम्पकानि सनागानि रक्तमन्दारकाणि च। अशोकोद्भवबिल्वाख्य कर्णिकारोद्भवानि च"। विश्वसारतन्त्रे शक्तिविषये विशेष उक्तो यथा "अथ देव्यर्चने वक्ष्ये पुष्पाणि शृणु पार्वति!। इत्युपक्रमे तुलस्यादीन्युक्त्वा "एतान्यन्यानि तन्त्रेऽस्मिन् पुष्पाणि सन्ति वै प्रिये!। नानादेशोद्भवानि स्युः सर्वकालोद्भवानि च। फलानि चैव पुष्पाणि दद्याद्देव्यै विशेषतः। अथ पुष्पं प्रवक्ष्यामि कर्मयोगे महेश्वरि! शृणुष्व परया भक्त्या यथोक्तं ब्रह्मणा पुरा। कमले करवीरे द्वे कुसुमे तुलसीद्वयम्। जातीसुमे केतकीद्वे कुमारीचम्पकोत्पलम्। कुन्दमन्दारपुन्नागपाटलानागचम्पकम्। आरग्बधं कर्णिकारं यावन्ती नवमल्लिका। सौगन्धिकं सकोरण्डं पलाशाशोकसर्जकाः। अपामार्गः सिन्धुवारो वापुलीकञ्च कामजम्। व्याघ्रचेलं दमनकं मरुवकं ततःपरम्। लवङ्गं जलकर्पूरं तगरञ्च जवा तथा। शिवपुष्पं द्रोणपुष्पं कामराजं सुकेतकम्। अन्यानि वनपुष्पाणि जलजस्थलजानि च।